-2 Disjunction (but, still, yet); शान्तमिदमाश्रमपदं स्फुरति च बाहुः Ś. 1. 14. -3 Certainly, determination, (indeed certainly, exactly, quite, having the force of एव); अतीतः पन्थानं तव च महिमा वाङ्मनसयोः G. M.; ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः R. 12. 45. -4 Condition (if = चेत्); जीवितुं चेच्छसे (= इच्छसे चेद्) मूढ हेतुं मे गदतः शृणु Mb; लोभश्चास्ति (अस्ति चेद्) गुणेन किम् Bh. 2. 45 v. l. -5 It is often used expletively (पादपूरणार्थे); भीमः पार्थस्तथैव च G. M. (Lexicographers give, besides the above, the following senses of च which are included in the general idea of *copulation*; 1 अन्वाचय joining a subordinate fact with a principal one; भो भिक्षामट गां चानय; see अन्वाचय. -2 समाहार collective combination; as पाणी च पादौ च पाणिपादम् -3 इतरेतरयोग or mutual connection; as प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ. -4 समुच्चय aggregation; as पचति च पठति च). च is frequently repeated with two assertions (1) in the sense of 'on the one hand-on the other hand', 'though-yet', to denote antithesis; न सुलभा सफलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम् V. 2. 9; 4. 3; R. 16. 7; or (2) to express simultaneous or undelayed occurrence of two events (no sooner than, as soon as); ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः R. 10. 6; 3. 40; 11. 50, 81; Ku. 3. 58, 66; Ś. 6. 7; Māl. 9. 39. **-Comp. -आदि** a Gaṇa of Pāṇini (including the indeclinable particles, P. I. 4. 57). **-कारः** the particle च; P. II. 3. 72, Kāśi. **-समासः** a Dvandva compound; Vop.

**चक्** 1 U. (चकति-ते, चकितं) 1 To be satiated, be contented or satisfied. -2 To repel, resist. -3 To shine.

**चकित** *a.* [चक्-कर्तरि क्त] 1 Shaking, trembling (through fear); भय°, साध्वस° Me. 27. -2 Frightened, made to tremble, startled; व्याधानुसारचकिता हरिणीव यासि Mk. 1. 17; Amaru. 46; Me. 14; R. 10. 73; Śivamahimnastotra 2. -3 Afraid, timid, apprehensive; चकितविलोकितसकलदिशा Gīt. 2; पौलस्त्यचकितेश्वराः (दिशः) R. 10. 73. **-तम्** 1 Trembling. -2 Alarm, fear. **-तम्** *ind.* With fear, in a startled manner, alarmingly, with awe; चकितमुपैमि तथापि पार्श्वमस्य M. 1. 11; सभयचकितम् Gīt. 5; Śānti. 4. 4. **-Comp. -चकित** *a.* greatly alarmed. **-हृदय** *a.* faint-hearted.

**चकास्** 2 P. (Rarely Ā.) (चकास्ति-स्ते, चकासाञ्चकार, अचकासीत्, चकासित) 1 To shine, be bright; गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम् Gīt. 10; चकासतं चारुचमूरुचर्मणा Śi. 1. 8; Bk. 3. 37. -2 (Fig.) To be happy or prosperous; वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासते Ki. 1. 17. *-Caus.* To cause to shine, illuminate; Śi. 3. 6. With वि to shine, be bright.

**चकासित** *a.* Shining, splendid, bright.

**चकोरः** [चक्-तृप्तौ ओरन् Uṇ. 1. 64] A kind of bird, the Greek partridge (said to feed on moonbeams); ज्योत्स्नापानमदालसेन वपुषा मत्ताश्चकोराङ्गनाः Vb. 1. 11; इतश्चकोराक्षि विलोकयेति R. 6. 59; 7. 25; स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयति लोचनचकोरम् Gīt. 10. (चकोरकः also.) (विषाभ्याशे) चकारस्ये अक्षिणी विरज्येते Kau. A. 1. 20. 17. **-Comp. -अक्ष** *a.* (= **-दृश्**); इतश्चकोराक्षि विलोकयेति R. 6. 59. **-दृश्** *a.* having (eyes like those of a Chakora bird) beautiful eyes; अनुचकार चकोरदृशां यतः Śi. 6. 48. **-नेत्र** *a.* (= **-दृश्**); द्विरदेन्द्रगतिश्चकोरनेत्रः Mk. 1. 3. **-व्रतम्** The vow *i. e.* the habit of a Chakora bird of drinking nectar from the moon; चकोरव्रतमालम्ब्य तत्रैवासन् दिवानिशम् Ks. 76. 11. **-चकोराय** To act like a Chakora bird; चकोरायितुमेते च प्रवृत्ते यावदुन्मुखे Ks. 89. 41.

**चक्क्** 10 P. (चक्कयति) 1 To suffer. -2 To give or inflict pain, trouble.

**चक्कल** *a.* [Uṇ. 1. 108.] Round, circular.

**चक्कसः** Dishonesty, crookedness, fraud; Vop. 26. 30.

**चक्रम्** [क्रियते अनेन, कृ घञर्थे क नि° द्वित्वम् Tv.] 1 The wheel of a carriage; चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च H. 1. 173. -2 A potter's wheel. -3 A sharp circular missile, weapon, a disc (especially applied to the weapon of Viṣṇu). -4 An oil-mill; दशसूनासमं चक्रं दशचक्रसमो ध्वजः Mb. 13. 125. 9. -5 A circle, ring; कलापचक्रेषु निवेशिताननम् Ṛs. 2. 14. -6 A troop, multitude, collection, Śi. 20. 17. -7 A realm, sovereignty; स्वस्थं स्वचक्रं परचक्रमुक्तम् Bu. Ch. 2. 15; cf. चक्रं सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे...। Medinī. -8 A province, district, a group of villages. -9 A form of military array in a circle. -10 A circle or depression of the body. -11 A cycle, cycle of years. -12 The horizon; यावदावर्तते चक्रं तावती मे वसुन्धरा Rām. 2. 10. 36. -13 An army, a host. -14 Section of a book. -15 A whirlpool. -16 The winding of a river. -17 An astronomical circle; राशि° the zodiac. -18 Circular flight (of birds &c.). -19 A particular constellation in the form of a hexagon. -20 Range, department in general. -21 The convolutions or spiral marks of the शालिग्राम. -22 A crooked or fraudulent contrivance. **-क्रः** 1 The ruddy goose (also called चक्रवाक); पद्मोल्लासविधायिनि सत्पथदीप्तिकृति चक्रभव्यकरे Viś. Guṇa. 274. -2 A multitude, troop, group. **-Comp. -अङ्गः** 1 a gander having a curved neck. -2 a carriage. -3 the ruddy goose (चक्रवाक); चक्राङ्गान् स च नित्यं वै सर्वतो वनगोचरान् Mb. 12. 268. 36. (**-ङ्गी**) a goose. (**-ङ्गम्**) a parasol. **-अटः** 1 a juggler, snake-catcher. -2 a rogue, knave, cheat. -3 a particular coin, a *dināra*. **-अधिवासिन्** *m.* the orange tree. **-अरः, (-रम्)** the spoke of a wheel; चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः। Svapna. 1. 4. **-अश्मन्** *n.* a machine to hurl stones at a distance; अयःकणपचक्राश्मभुशुण्ड्युद्यतबाहवः Mb. 1. 227. 25. **-आकार, -आकृति** *a.* circular, round. **-आयुधः** an epithet of Viṣṇu. **-आवर्तः** whirling or rotatory motion. **-आह्वः, -आह्वयः** the ruddy goose; **-ईश्वरः** 1 'lord of the discus', N. of Viṣṇu. -2 the officer in charge of a district. **-ईश्वरी** N. of the Jaina goddess of learning. **-उपजीविन्** *m.* an oil-man. **-कारकम्** 1 a nail. -2 a kind of perfume. **-गजः** the plant Cassia Tora. **-गण्डुः**